रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ॥ धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसंतं तेद्यापि त्यजति न मृगव्याधरभसः ॥२२॥ स्वलावण्याशंसाधृतधनुष
मह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ॥ यदि स्त्रैणं देवी यमनिरत दे
हार्द्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥२३॥ श्मशानेष्वाक्री
डा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ॥
अमंगल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मंगलम
सि ॥२४॥ मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमद
सलिलोत्संगितदृशः ॥ यदालोक्याह्लादं ह्रद इव निमज्यामृतमये दधत्यंतस्त
त्त्वं किमपि यमिनस्तत्किल भवान् ॥२५॥ त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुत
वहस्त्वमापस्त्वं व्योमस्त्वमु धरणिरात्मा त्वमिति च ॥ परिच्छिन्नामेवं त्वयि परिण

ता शतधृतिरगेंद्रो धनुरथो रथांगे चंद्रार्कौ रथचरणपाणिः शर इति ॥
दिधक्षोस्ते कोयं त्रिपुरतृणमाडंबरविधिर्विधेयैः क्रीडंत्यो न खलु परतं
त्राः प्रभुधियः ॥१८॥ हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने त
स्मिन्निजमुदहरन्नेत्रकमलं । गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगतां ॥१९॥ क्रतौ सुप्ते जाग्रत्त्वमसि फल
योगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ॥ अतस्त्वां सं
प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः ॥२०॥
क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सद
स्याः सुरगणाः । क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधु
रमभिचाराय हि मखाः ॥२१॥ प्रजानाथं नाथः प्रसभमभिकं स्वां दुहितरं

हायचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयनविषंसंहृतवतः।
सकल्माषः कंठेतवनकुरुतेनश्रियमहो विकारोपिश्लाघ्योभुवनभयभंग
व्यसनिनः॥१४॥ अ■ सिद्धार्थानैवक्वचिदपिसदेवासुरनरेनिवर्तंतेनि
त्यंजगतिजयिनोयस्यविशिखाः॥सपश्यन्नीशत्वामितरसुरसाधारणम
भूत्स्मरः स्मर्तव्यात्मानहिवशिषुपथ्यः परिभवः॥१५॥ महीपादाघाता
द्व्रजतिसहसासंशयपदंपदंविष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं
तां॥ मुहुर्द्यौर्दौस्थ्यंयात्यनिभृतजटाताडिततटाजगद्रक्षायैत्वंनटसि
ननुवामैवविभुता॥१६॥ वियद्व्यापीतारागणगुणितफेनोद्गमरुचिः।
प्रवाहोवारांयः पृषतलघुदृष्टः शिरसिते जगद्द्वीपाकारंजलधिवलयंतेन
कृतमित्यनेनैवोन्नेयंधृतमहिमदिव्यंतववपुः॥१७॥ रथः क्षोणी

नुधृष्टा मुखरता ॥८॥ तवैश्वर्यं यत्नाद्यदुपरि विरिंचिर्हरिरधः परिछेत्तुं या
वनलमनलस्कंधवपुषः ॥ ततो भक्तिः श्रद्धाभरगुरुगृणद्भ्यां गिरिश यत् ॥
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥ अयत्नादापाद्य त्रिभुवनम
वैरव्यतिकरं दशास्यो यद्बाहूनभृत रणकंडूपरवशान् ॥ शिरःपद्मश्रे
णीरचितचरणांभोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदं ॥११
॥ अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेपि त्वदधिवसतौ विक्रम
यतः ॥ अलभ्या पातालेप्यलसचलितांगुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुव
मुपचितो मुह्यति खलः ॥१२॥ यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ॥ न तच्चित्रं तस्मिन्वरिवसितरि त्व
च्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥ अकांड ब्रह्मां

म०हि० ॥२॥

र विधिरनाद्रित्य भवति ॥ अनीशो वा कुर्याद्भुवनजनने कः परिक
रो यतो मंदास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥ त्रयी सांख्यं योग पशुपति
मतं वैस्नवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ॥ रुची
नां वैचित्र्याद्दजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पय
सामर्णव इव ॥७॥ महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः कपा
लं चेतीयत्तव वरद तंत्रोपकरणं ॥ सुरास्तां तामृद्धिं विदधति भवद्भ्रूप्रणि
हितां न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥ ध्रुवं कश्चित्स
र्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ॥
समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवन् जिह्रेमि त्वां न खलु न

त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेस्मिन् पुरमथन बुद्धिर्
व्यवसिता ॥ ३ ॥ तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत् त्रयीवस्तु व्य
स्तं तिसृषु गुणभिन्नासु तनुषु ॥ अभव्यानामस्मिन् वरद रमणीयामरम
णीं विहंतुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४ ॥ किमीहः किंकायः स
खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च ॥ अतर्क्यै
श्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोयं कांश्चिन्मुखरयति मोहा
य जगतः ॥ ५ ॥ अजन्मानो लोकाः किमवयववंतोपि जगतामधिष्ठातारं किं भव

ॐ श्रीगणेशायनमः ॥ ॐ नमः शिवाय ॥ महिम्नः पारं ते परमविदुषो यद्य
सदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ॥ अथावाच्यः
सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येषः स्तोत्रे हर निरपवादः
परिकरः ॥१॥ अतीतः पंथानं तव च महिमा वांमनसयोरतद्व्यावृत्त्यायं
चकितमभीधत्ते श्रुतिरपि ॥ स कस्य स्तोतव्यः कतिविधगुणः कस्य वि
षयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥ मधुस्फीता वाचः प
रममृतं निर्मितवतः स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदं ॥ मम

श्रीमहिम्नपोथि हे पत्रं १

तां विभृत गिरं न विद्मस्तत्त्वं वयमिह हि यत्त्वं न भवसि ॥२६॥ त्रयीं तिस्रो वृत्तीस्त्रिभुवन
मथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृतिः ॥ तुरीयं ते धा
म ध्वनिभिरवरुंधानमणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदं ॥२७॥ भ
वः सर्वो रुद्रः पशुपतिरथोग्रः सहमहांस्तथा भीमेशानाविति यदभिधानाष्टकमि
दं ॥ अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि प्रियायास्मै धाम्ने प्रणिहितनमस्यो
स्मि भवते ॥२८॥ नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरह
ष्ठाय च नमः ॥ नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो नमः सर्वस्मै ते तदिदमिति
सर्वाय च नमः ॥२९॥ बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे सं
हारे हराय नमो नमः जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः प्रमहसि
पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥ कृशपरिणति चेतः क्लेशवश्यं क्व चेदं

कचिदं गुणसीमोल्लंघिनी शश्वदृद्धिः। इति चकितममंदीकृत्य मां भक्तिराधाद

चरणयोस्ते वाक्यपु[illegible]ष्पोपहारं ॥३१॥ असितगिरिसमं स्यात्कज्जलं सिंधुपात्रे

रतरुवरशाखा लेखनी पत्रमुर्वी॥ लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि गुणाना

मिश पारं न याति॥३२॥ असुरसुरमुनींद्रैरर्चितस्येंदुमौलेर्ग्रथितगुणमहिम्नो

निर्गुणस्येश्वरस्य॥ सकलगुणवरिष्ठः पुष्पदंताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमे

तच्चकार॥३३॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परमभक्त्या शुद्धचित्तः पुमा

न्यः॥ स भवति शिवलोके रुद्रतुल्यः सदात्मा प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च

॥३४॥ दीक्षा दानं तपस्तीर्थं होम यागादिकाः क्रिया॥ महिम्नस्तव पाठस्य कलां

नार्हंति षोडशीं॥३५॥ समाप्तोयं समस्तोत्रं सर्वेसीश्वरवर्णनं॥ अनुपमं मनोहा

रि पुण्यं गंधर्वभाषितं॥३६॥ महेशान्नापरो देवो महिम्नो नापरा स्तुतिः॥

घोरान्नापरो मंत्रो नास्ति तत्वं गुरोः परं ॥ ३७ ॥ कुसुमदशननामा सर्वगंधर्वराजः
शशिधरवरमौलेर्देवदेवस्य दासः ॥ स गुरु निजमहिम्नो भ्रष्ट एवास्य रोषात्स्तवन
मिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥ ३८ ॥ सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं पठति
यदि मनुष्यः प्रांजलिर्नान्यचेताः ॥ व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमि
दममोघं पुष्पदंतप्रणीतं म ॥ ॥ ३९ श्री पुष्पदंतमुखपंकजनिर्गतेन स्तोत्रेण
किल्बिषहरेण हरप्रियेण ॥ कंठस्थितेन पठितेन समाहितेन सुप्रीणितो भव
ति भूतपतिर्महेशः ॥ ४० ॥ ४० ॥ इति श्री पुष्पदंताचार्येण विरचितं महिम्ना
ख्यं स्तोत्रं संपूर्णम् ॥ ॥ सम्वत १९५५ सल मे

कचिंदं गुणासोमोसं चिनीश एवबुद्धिा।र नित्यकितमसंहीकृत्यमामनिशा धाहात
चरणायोस्तेवाक्यपु[illegible]षोपहार ॥३१॥ अमितगिरिसमंस्याकज्ज्वलसिंधुपात्रे सु
रतरुवरशाखालेखनीपत्रमुर्वी ॥ लिखतियदिगृहीत्वा सारदासर्वकालंतदपितवगुणाना
मीश पारंनयाति ॥३२॥ असुरसुरमुनीन्द्रै रचितस्येंदुमौले र्ग्रथितगुणमहिम्नो
निर्गुणस्येश्वरस्य ॥ सकलगुणवरिष्ठः पुष्पदंताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमे
तच्चकार ॥३३॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठतिपरमभक्त्या शुद्धचित्तः पुमा
न्यः ॥ सभवतिशिवलोके रुद्रतुल्यः सदात्र प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च
॥३४॥ दीक्षादानं तपस्तीर्थं होमयागादिकाः क्रियाः ॥ महिम्नस्तव पाठस्य कलां
नार्हन्तिषोडशीं ॥३५॥ समाप्तोयंसमस्तोत्रंसर्वसौख्यप्रदायकं ॥ अनुपमंमनोहा
रिपुण्यंगंधर्वभाषितं ॥३६॥ महेशान्नापरोदेवो महिम्नोनापरास्तुतिः ॥ अ

४

घोरान्नापरोमंत्रोनास्तितत्वंगुरोः परं ॥ ३७॥ कुसुमदशननामासर्वगंधर्वराजः
शशिधरवरमौलेर्देवदेवस्यदासः॥ सगुरुनिजमहिम्नोभ्रष्ट एवास्यरोषात्स्तवन
मिदमकार्षीद्दिव्यदिव्यंमहिम्नः॥ ३८॥ सुरवरमुनिपूज्यंस्वर्गमोक्षैकहेतुंपठति
यदिमनुष्यःप्रांजलिर्नान्यचेताः॥ व्रजतिशिवसमीपंकिन्नरैःस्तूयमानःस्तवनमि
दममोघंपुष्पदंतप्रणीतं॥ ३९॥ ॥ ३९ श्रीपुष्पदंतमुखपंकजनिर्गतेनस्तोत्रेण
किल्बिषहरेणहरप्रियेण॥ कंठस्थितेनपठितेनसमाहितेनसुप्रीणितोभव
तिभूतपतिमहेशः॥ ४०॥ ४०॥ इतिश्रीपुष्पदंताचार्येणविरचितंमहिम्ना
ख्यंस्तोत्रंसंपूर्णम्॥ ॥ समत १९५५ सल मे

श्रीगणेशाय नमः ॥ स्वरादिनिपातमव्ययम् । स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः । प्राग्रीश्वरान्निपाता इत्यधि
कारादधिरीश्वर इत्येतत्पर्यन्तं ये वक्ष्यन्ते ते निपाताः नन्वेवं चादिष्वेव स्वरादयोपि पठ्यन्तां । प्रकृतसूत्रं व्यर्थं
नाम । अव्ययप्रदेशेषु निपातपदेनैव व्यवह्रियतामिति चेन्न । चादीनां त्वसत्त्ववाचिनामेव निपातसंज्ञा य
थालोधं न यान्ति पशुमन्यमनाड् यत्र समागर्भस्य पशुरादयः । ननु सत्त्ववाचिनां । यथा परं हस्तोश्च अे...य
प्यानि स्यादि । स्वरादीनां तु सत्त्ववाचिनामव्ययसंज्ञेष्यते । स्वस्ति वा वयति । स्वः पश्यति यथा । अभ्युपायी स्वरा
निपाताः स्वरादीनि चादयोऽसत्त्वे इति कुतो न सत्त्वेनामिति चेन्न । एवं सति निपात एकाजनाङिति प्रगृह्यसं
ज्ञा स्वरादीनामेकाचां प्रसज्येत । स्तो हि च चादिषु विमो अ...त हि...रा हाव इत्येकाचौ तद्धितौ । ते न प्रभवन्ते
यस्तु श्रुतः स्वकार्यः । यदि तु चादिरेवाऽनाङिति क्रियते तेहा चादिभ्यामसत्त्ववचनार्थं न लभ्येत् । तेन स्वरादि स्व
तन्त्रमहं न सतः सम्यान्न मेऽव इत्यत्र प्रगृह्यत्वं स्यात् । तद्वारणाय हि सत्त्वं म् । ननु चादयोऽसत्त्वे इत्यत्र असत्त्व
वे इति पाठविशेषणात् तथा हि । चादय इति योगो विभज्यते । चादयो निपातसंज्ञाः स्युः । ततोऽसत्त्वे । इत्यर्थान्त्र
चादयो सेयाः । तेन स्वरादीनां सत्त्ववाचिनां पाठान्तर्भावः । एतेन एव इत्यादीनेन शेषः । एवं वोभे संसेने ...